শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

শ্রী মেল্পপত্তূর্ নারাযণভট্টতিরি ৱিরচিতম্

# ॥শ্রীমন্নারাযণীযম্ ॥

## দশক - ৩৩

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

শ্ৰীঃ
শ্ৰীমতে কৃষ্ণায পরব্ৰহ্মণে নমঃ
শ্ৰীমতে রামানুজায নমঃ

# ॥শ্ৰীমন্নারাযণীযম্ ॥

## দশক - ৩৩

*অম্বরীষোপাখ্যানম্*

বৈৱস্ৱতাখ্যমনুপুত্রনভাগজাত-
    নাভাগনামকনরেন্দ্রসুতোম্বরীষঃ।
সপ্তার্ণৱাৱৃতমহীদযিতোপি রেমে
    ত্বতসঙগিষু ত্বযি চ মগ্নমনাসসদৈৱ॥ ১ ॥

ত্বতপ্রীতযে সকলমেৱ ৱিতন্বতোস্য
    ভক্ত্যৈৱ দেৱ নচিরাদভৃথাঃ প্রসাদম্।
যেনাস্য যাচনমৃতেপ্যভিরক্ষণার্থং
    চক্রং ভৱান্ প্রৱিততার সহস্রধারম্॥ ২ ॥

স দ্বাদশীৱ্রতমথো ভৱদর্চনার্থং
    ৱর্ষং দধৌ মধুৱনে যমুনোপকণ্ঠে।
পত্ন্যা সমং সুমনসা মহতীং ৱিতন্বন্
    পূজাং দ্বিজেষু ৱিসৃজন্ পশুষষ্টিকোটিম্॥ ৩ ॥

তত্রাথ পারণদিনে ভৱদর্চনান্তে
    দুর্ৱাসসাস্য মুনিনা ভৱনং প্রপেদে।
ভোক্তুং ৱৃতশ্চ স নৃপেণ পরার্তিশীলো
    মন্দং জগাম যমুনাং নিযমান্ ৱিধাস্যন্॥ ৪ ॥

রাজ্ঞাথ পারণমুহূর্তসমাপ্তিখেদা-
    দ্বারৈৱ পারণমকারি ভৱতপরেণ।
প্রাপ্তো মুনিস্তদথ দিৱ্যদৃশা ৱিজানন্
    ক্ষিপ্যন্ ক্রুধোদধৃতজটো ৱিততান কৃত্যাম্॥ ৫ ॥

কৃত্যাং চ তামসিধৰাং ভুৱনং দহন্তী-
মগ্রেভিৱীক্ষ্য নৃপতির্ন পদাচ্চকম্পে।
ত্বদভক্তবাধমভিৱীক্ষ্য সুদর্শনং তে
কৃত্যানলং শলভযন্ মুনিমন্বধাৱীত্॥ ৬ ॥

ধাৱন্নশেষভুৱনেষু ভিযা স পশ্যন্
ৱিশ্বত্র চক্রমপি তে গতৱান্ ৱিরিঞ্চম্।
কঃ কালচক্রমতিলঙঘযতীত্যপাস্তঃ
শর্ৱং যযৌ স চ ভৱন্তমৱন্দতৈৱ॥ ৭ ॥

ভূযো ভৱন্নিলযমেত্য মুনিং নমন্তং
প্রোচে ভৱানহমৃষে ননু ভক্তদাসঃ।
জ্ঞানং তপশ্চ ৱিনযান্বিতমেৱ মান্যং
যাহ্যম্বরীষপদমেৱ ভজেতি ভূমন্॥ ৮ ॥

তাৱতসমেত্য মুনিনা স গৃহীতপাদো
রাজাপসৃত্য ভৱদস্ত্রমসাৱনৌষীত্।
চক্রে গতে মুনিরদাদখিলাশিষোঽস্মৈ
ত্বদভক্তিমাগসি কৃতেপি কৃপাং চ শংসন্॥ ৯ ॥

রাজা প্রতীক্ষ্য মুনিমেকসমামনাশ্বান্
সম্ভোজ্য সাধু তমৃষিং ৱিসৃজন্ প্রসন্নম্।
ভুক্তৱা স্বযং ত্বযি ততোপি দৃঢং রতোভূ-
তসাযুজ্যমাপ চ স মাং পৱনেশ পাযাঃ॥ ১০ ॥

**********